tuent part यद्वा उत्तमप्रयाजपशुपुरोडाशस्विष्टकृदित्येवमादय इति विषयप्रदर्शकवाक्ये आदिशब्दसंगृहीतपिष्टलेपफलीकरणहोमाद्यभिप्रायेणेदं तेषां होमत्वेन तत्र प्रक्षेपस्यांशत्वसंभवादिति ध्येयम् MayūMāli. 355. 20 (*on* iv. 1. 7)

**अंशत्वसिद्धि** (aṁśatva-siddhi) *f.* establishment of the state of being a part न च ··· अंशत्वप्रतिपादकाच्च मन्त्रवर्णात् ··· जीवानां ईश्वरांशत्वसिद्धिः Bhām. 501. 15 (*on* ii. 3. 43)

**अंशत्वानुपलब्धि** (aṁśatvānupalabdhi) *f.* non-perception of the state of being a part तृतीयेंऽशत्वाभावादेवांशत्वानुपलब्धिर्युक्ता NyāySiA. 226. 4; 226. 2.

**अंशत्वानुमान** (aṁśatvānumāna) *n.* inference about the state of being a part श्रुतिद्वयमिवांशत्वानुमानं चोक्तं भवति NyāySu.(Ja.) 504A. 3 (*on* iii. 2. 9.

**अंशत्वाभाव** (aṁśatvābhāva) *m.* absence of the state of being a part तृतीयेंऽशत्वाभावादेवांशत्वानुपलब्धिर्युक्ता NyāySiA. 226. 3.

**अंशत्वाभ्युपगम** (aṁśatvābhyupagama) *m.* acceptance of the state of being a part अंशत्वाभ्युपगमे ह्युभयं मुख्यं भवति VedāntSā. (Rā.) 217. 4 (*on* ii. 3. 42)

**अंशत्वावगम** (aṁśatvāvagama) *m.* comprehension of the state of being a part भेदाभेदावगमाभ्याम् अंशत्वावगमः BrahmSūBh. (S'aṅ.) 479. 17 (*on* ii. 3. 43)

**अंशत्वावच्छिन्न** (aṁśatvāvacchinna) *adj.* limited or distinguished by the state of being a part अंशत्वावच्छिन्नेन बन्धमोक्षार्हेण स्वरूपेण भिन्नोऽपि··· तदभिन्नः VedāntKau. 236. 9 (*on* ii. 3. 42); 238. 25 (*on* ii. 3. 48)

**अंशत्वाविशेष** (aṁśatvāviśeṣa) *m.* non-distinction in respect of being a part तथा सत्यंशत्वाविशेषान्मत्स्यादिसाम्यापातात् TattvPrakā. 123A. 3 (*on* ii. 3. 46); 124A. 9 (on ii. 3. 50); एवं जीवस्यांशत्वाविशेषेऽपि ब्रह्मादिस्थावरान्तानां उच्चनीचत्वम् AṇuBh. 126. 15 (*on* ii. 1. 23); GoviBh. 166. 8 (*on* ii. 3. 44)

**अंशत्वोक्ति** (aṁśatvokti) *f.* statement regarding the state of being a part न च अंशो ह्येष परमस्य··· इति श्रुतौ···अंशो नानाव्यपदेशात् इति सूत्रे चांशत्वोक्तेरैक्यम् Nyāyāmṛ. 606A. 5.

**अंशत्वोपपत्ति** (aṁśatvopapatti) *f.* appropriateness of the state of being a part न च ब्रह्मखण्डो जीव इत्यंशत्वोपपत्तिः, खण्डानर्हत्वाद् ब्रह्मणः VedāntTaSā. 59. 4.

**अंशत्वोपपादन** (aṁśatvopapādana) *n.* justification of the state of being a part अंशत्वोपपादनमुखेन शरीरवाचिशब्दस्य शरीरिपर्यन्ताभिधानमुपपाद्य तत उभयव्यपदेशमुख्यत्वमिह निर्णीयते S'rutaPra. ii. 380. 26 (*on* ii. 3. 42)

**अंशदान** (aṁśa-dāna) *n.* giving of a share (in property or inheritance) अंशदानविवक्षायां बहुभ्रातृकायाः बहुधनत्वं बहुभगिनीकस्य च निर्धनता प्राप्नोतीति···Mitā. 230. 25 (*on* 2. 124); असंस्कृतासु पूर्वमंशदानम् ततस्तासां संस्कारः BālamBha. ii. 156. 22 (*on* 2. 124); ii. 160. 26 (*on* 2. 125); S'ukrNī. 5. 10.

**अंशदापन** (aṁśa-dāpana) *n.* causing the payment of a portion (of debt) धनाल्पत्वे तु तत्तदृणानुसारेण विभज्य युगपदंशदापनम् SmṛtiCan. iv. 391. 10.

**अंशदाह** (aṁśa-dāha) *m.* burning of a part, partial burning (of a sacrificial cake) अंशदाहस्य नित्यत्वात् सर्वदाहे पुनर्यजिः NyāyMāVi. 331. 23 (*on* vi. 4. 5)

**अंशदीर्घ** (aṁśa-dīrgha) *adj.* one unit long (unit area of one square) केसराण्यंशदीर्घाणि दलमूलार्धकर्णिका PauṣkS. 6. 9.

**अंशदेश** (aṁśa-deśa) *m.* shoulder-region विपुलो विस्तीर्णः स्कन्धः अंशदेशो यस्य स तथा AupaSūṬ. 34. 4.

**अंशदोष** (aṁśa-doṣa) *m.* inauspiciousness of (the ninth) part of an asterism or astrological house or *rāśi* महादोषचयं ब्रवीमि । पञ्चाङ्गदोषो रविसंक्रमश्च ससंग्रहः कर्तरिकांशदोषौ VasiS. 32. 21.

[1]**अंशद्वय** (aṁśa-dvaya) *n.* **1** two degrees राशिचतुष्टयमंशद्वयं कलाविंशतिर्वसुसमेता । नववेदाश्च विलिप्ताः शनेर्धनं मध्यमस्यैव PañcSi. 16. 5; **2 A** two constituent elements or factors (for the realisation of Bhāvanā) सेयं भावना अंशद्वयपरिपूर्णा सती ··· इतिकर्तव्यतामपेक्षते TantrVā. 355. 24 (*on* ii. 1. 1); (हिंसायाः) अंशद्वयगताया विहितत्वेनाप्रतिषेधान्नानर्थत्वम् TātpaṬ. (U.) 115. 15 (*on* 2. 264); न चांशद्वयावच्छिन्नस्य व्यापारस्य श्रेयःसाधनत्वं रूपं वक्तुमुचितम् NyāyMañ. i. 332. 1; अंशद्वयगतैव हिंसा निषेधस्याविषयः NyāyRa. 117. 15 (*on* 2. 231); न तु वाक्यभेदः, अंशद्वयविशिष्टाया भावनायाः फलं प्रति विधानात् NyāyRa. 919. 9 (*on* 7. 266); एवमंशद्वयस्याविधेयत्वे ज्योतिष्टोमादेरपि विधेयत्वं न स्यात् YuktiSneha. 29. 5 (*on* i. 1. 2); अंशद्वयगतहिंसायाः YuktiSneha. 30. 25 (*on* i. 1. 2); अंशद्वयगामिनीYuktiSneha. 29. 7 (*on* i. 1. 2); एकनिराकरणेनैवेतरनिराकरणसिद्धेरंशद्वयनिराकरणमनर्थकमत आह NyāySu. (So.) 72. 7 (*on* i. 2. 19); अंशद्वयविचारः NyāySu. (So.) 72. 2 (*on* i. 2. 19); जानात्येवासौ, मयैतत्कर्तव्यमिति, उपायं तु न वेदेत्यादौ··· अंशद्वयगामी विधिरवगम्यते Kāśi.(Su.) i. 172. 16 (*on* 2. 208); **2 B** two parts or portions or sections or aspects etc. घटमिति जानामीति चांशद्वयं विषयनिष्ठमेव जातम् NyāyMañ. ii. 5. 11; ननु अहम् इति निरंशश्चिदात्मा प्रतीयते, न तु इदं रजतम् इतिवदंशद्वयानुविद्धं रूपम् VivaPraSaṁ. 28. 14; स्मृतावप्यंशद्वयमैन्द्रियकज्ञानमिव साक्षादवभासते TantrRaha. 8. 27(1); नन्वहमर्थविषयेंऽशद्वयमस्ति S'atDū. 123. 19; एकांशेन बलं धार्यं दानमंशद्वयेन च BallāC. 65. 1(13); (तथा सति) अंशद्वयासत्त्वमेव ज्ञानस्य भवेत् Kāśi.(Su.) ii. 149. 10 (on 5. 126); यजेतेत्यत्रास्त्यंशद्वयम् MīmāNyāPra. 193. 17; ArthSaṁ. 9. 2; ईशाविष्टेषु तप्तायःपिण्डवदंशद्वयमस्ति GoviBh. 234. 13 (*on* iii. 3. 25); **2 C** two units of measurement भित्तयोंऽशद्वयेनैव PauṣkS. 43. 171; अत्र स्युर्भूमयः सप्त प्रथमांशद्वयोच्छ्रिता SamarāSū. ii. 107. 20; कलशोंऽशद्वयोच्छ्रायः कार्यः पल्लवभूषितः SamarāSū. ii. 75. 22; **3** two shares in inheritance or property एवं क्षत्रियात्···वैश्यायामुत्पन्नोंऽशद्वयं···लभते इत्यर्थः Subodhi. 53. 12 (*on* 2. 122); (अंशद्वयेन) Subodhi. 8. 24 (*on* 2. 20); स्वार्जितधने पितुरंशद्वयग्रहणावग्रहो न भवतीत्यत्र तात्पर्यम् VīraMi. (Vyavahāra.) 445. 15; एकस्य ह्यंशद्वये अर्धोऽर्ध इति व्यवहारो भवति BālamBha. i. 265. 4 (*on* 1. 89); ii. 23. 29 (*on* 2. 20); ii. 151. 23 (*on* 2. 120); वैश्याकन्यकायै स्वजातिविहितादंशद्वयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात् Subodhi. 55. 1 (*on* 2. 124)

[2]**अंशद्वय** (aṁśa-dvaya) *n.* two shoulders [= अंसद्वय] नम्रं कलाविहीनं तु कुर्यादंशद्वयं तथा AgniP. 45. 10; न्यस्येत्···श्वेतद्वीपं च···कल्पवृक्षम् । हृद्देशेंऽशद्वयोरुद्वयवदनकटीपार्श्वयुग्मेषु भूयः PañcaRā.(Nā.) iii. 2. 27.

**अंशद्वयवत्** (aṁśadvaya-vat) *adj.* consisting of two sections अंशद्वयवति निगमे साधयति द्वैतमेक एवांशः SvātmaNi. 50.

**अंशद्वयवत्त्व** (aṁśadvayavat-tva) *n.* the state of having two parts or elements इदं रजतम् इतिवद् अहं मनुष्य इत्यंशद्वयवत्त्वेनाधिष्ठानारोप्यभावः प्रतीयते VivaPraSaṁ. 28. 17.

**अंशद्वैगुण्य** (aṁśa-dvaiguṇya) *n.* double the amount or share, साधयेत्···लुब्धमंशद्वैगुण्येन ArthS'ā. ii. 331. 5 (7. 14)

**अंशधर्मत्व** (aṁśadharma-tva) *n.* the state of being the characteristics of a part पर्यायास्तूत्पादव्ययध्रौव्यैरालम्ब्यन्ते, उत्पादव्ययध्रौव्याणामंशधर्मत्वात्, बीजाङ्कुरपादपवत् TattvPradī.(A.) 139. 8 (*on* 2. 9)

**अंशधारिन्** (aṁśa-dhārin) *adj.* having parts, admitting of parts, तेजःपुञ्जैर्यथा तेजः पयःपूरैर्यथा पयः । परिस्फुरति संस्पन्दैस्तथा चित् सर्गविभ्रमैः । तत्स्वभावेन चिन्नाम्ना···निरंशेनांशधारिणा । YogVā. iv. 36. 17.

**अंशन** (aṁś-ana) *n.* the act of dividing; DhātuPā. (Kāśakṛ. p. 288.)

**अंशनवति** (aṁśa-navati) *f.* ninety degrees अङ्कितमंशनवत्या धनुषोऽर्धं तुर्यगोलकं यन्त्रम् BrāhmSphuSi. 22. 14.

**अंशनाथ** (aṁśa-nātha) *m.* the lord of the *navāṁśa* or the 9th part of a zodiacal sign अर्थाप्तिः···होरेन्दोर्दशमगतैर्विकल्पनीया मेन्द्रर्कास्पदपतिगांशनाथवृत्त्या Bṛhajjā. 10. 1; लग्नेशमासेशसमेश्वरांशनाथा यदंशाधिपमित्रदृष्ट्या । दृष्टा युता वा शशिना च तत्तद्भावोत्थसौख्याय न चेदनिष्टम् ॥ TājiNī. ii. 7. 10 (298)

**अंशनियम** (aṁśa-niyama) *m.* regulation or limitation as regards a share ननु कथमयमंशनियमो घटते Mitā. 303. 8 (*on* 2. 265); यत्र ऋणे अंशनियमेन अनेके प्रतिभुवो भूतास्तत्र मूलऋणिकाभावे स्वकीयं स्वकीयमंशं ते दद्युः DīpKa. 45. 6 (*on* 2. 55)

**अंशनिरवयवत्व** (aṁśa-niravayavatva) *n.* partless nature or indivisibility of the part अंशनिरवयवत्वादंशिनोऽपि निरवयवत्ववचने सर्वस्याप्यवयविनो निरवयवत्वाविरोधेन सावयवत्वलक्षणनिषेध्यासिद्धौ निषेधासिद्धेः S'atDū. 199. 8.

**अंशनिर्गत** (aṁśa-nirgata) *adj.* projected by or having a projection of one unit of measure भागद्वितयविस्तारः प्राग्ग्रीवश्चांशनिर्गतः SamarāSū. 49. 175.

**अंशनिषेध** (aṁśa-niṣedha) *m.* denial of a share in inheritance or property यत्र शाब्द आर्थो वा अंशनिषेधस्तत्रैव ग्रासादि नान्यत्र BālamBha. ii. 174. 32 (*on* 2. 132)

**अंशनिष्कर्ष** (aṁśa-niṣkarṣa) *m.* determination by parts अंशनिष्कर्षपक्षे तु धर्मभेदो बलाद् भवेत् NyāyMañ. i. 92. 10.

**अंशपक्ष** (aṁśa-pakṣa) *m.* the theory or view that the individual soul (*jīva*) is the delimited part of the universal soul (*brahman*) जीवस्य ब्रह्मसंबन्धि रूपमुच्यते । जीवो नाम ब्रह्मणोंऽशः ।··· ब्रह्मवादेंऽशपक्ष एव AṇuBh. 155. 5 (*on* ii. 3. 43)

**अंशपङ्क्ति** (aṁśa-paṅkti) *f.* a row of square-units अंशपङ्क्तिद्विषट्कोणदिक्षु द्वारचतुष्टयम् । कुर्याच्छोभाष्टकं चैव तूपशोभाष्टकं तथा PauṣkS. 10. 54; अंशपङ्क्तित्रयोत्थेन कोणमानस्य मध्यतः । पाण्डरोज्ज्वलरागेण पूरणीयं तदन्तरात् PauṣkS. 10. 85.

**अंशपञ्चक** (aṁśa-pañcaka) *n.* a group of five elements or factors or